# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा – जुलाई - २०२१

| | | |
|---|---|---|
| कक्षा – आचार्य – २ | प्रश्नपत्रम् – २ | गुणाः – ५० |
| विषयः – धर्मशास्त्रम् | सत्रम् – ४ | समयः – १० तः १२ |
| दिनाङ्कः – १४/०७/२०२१ | सन्दर्भग्रन्थः – निर्णयसिन्धुः तृतीयपरिच्छेदः उत्तरार्धः | |

सूचना - **निम्नलिखितेषु एकादशप्रश्नेषु केचन पञ्चप्रश्नाः विधेयाः।**
**प्रत्येकं प्रश्नस्य समानगुणाः। (१०)**

प्रश्नः १ **अधोलिखितेषु द्वयोः पद्ययोः व्याख्यां कुरुत।**

१ पौत्रश्च पुत्रिकापुत्रः स्वर्गप्राप्तिकरावुभौ।
रिक्थे च पिण्डदाने च समौ तौ परिकीर्तितौ॥

२ अयमेव विधिः प्रोक्तः शूद्राणां मन्त्रवर्जितः।
अमन्त्रस्य तु शूद्रस्य विप्रो मन्त्रेण गृह्यते॥

३ न ब्राह्मणं परीक्षेत दैवे कर्मणि धर्मवित्।
पित्र्ये कर्मणि तु प्राप्ते परीक्षेत प्रयत्नतः॥

४ अविद्धकर्णः कृष्णश्च लम्बकर्णस्तथैव च।
वर्जनीयाः प्रयत्नेन ब्राह्मणाः श्राद्धकर्मणि॥

प्रश्नः २ दैवे पित्र्ये च कर्मणि विप्रविचारं स्पष्टयत।

प्रश्नः ३ श्राद्धपरिभाषां विलिख्य श्राद्धमहत्त्वं प्रतिपादयत।

प्रश्नः ४ दैवे पित्र्ये च होमे सव्यापसव्यनिर्णयं स्पष्टयत।

प्रश्नः ५ श्राद्धकर्मणि दानादिकर्मणां फलं महत्त्वञ्च वर्णयत।

प्रश्नः ६ **अधोलिखितेषु द्वयोः पद्ययोः व्याख्या कार्या।**

१ पात्राणि चालयेच्छ्राद्धे स्वयं शिष्योऽथवा सुतः।
न स्त्रिभिर्न च बालेन नासजात्या कथञ्चन॥

२ ताम्बूलं दत्तकाष्ठं च स्नेहस्नानमभोजनम्।
रत्यौषधपरान्नानि श्राद्धकर्ता विवर्जयेत्॥

३ व्रतयज्ञविवाहेषु श्राद्धे होमेऽर्चने जपे ।
आरब्धे सूतकं न स्यात् अनारब्धे तु सूतकम् ॥
४ जन्मन्यथोपनयते विवाहे पुत्रकस्य च ।
पितृन्नान्दिमुखान्नाम तर्पयेद्विधिपूर्वकम् ॥

**प्रश्नः ७** नित्यादिश्राद्धप्रकारान् विलिख्य तेषां महत्त्वं प्रतिपादयत ।

**प्रश्नः ८** पिण्डदानादिविधाने कर्तव्यकर्मणां निरूपणं कुरुत ।

**प्रश्नः ९** नान्दीश्राद्धे कर्तव्यमुख्यकर्मणां विवरणं कुरुत ।

**प्रश्नः १०** यात्रायां अशौचे प्राप्ते किं कर्तव्यम् विनिर्दिशत ।

**प्रश्नः ११** **दशानां प्रश्नानां लघूत्तराणि लिखत ।**

१ कितिविधाः पुत्राः पिण्डदानोदकक्रियाः कर्तुं योग्याः ?
२ पुत्राभावे पिण्डादिकर्मणि कः ग्राह्यः ?
३ कः पुत्रः गूढजः स्मृतः ?
४ कः पुत्रः दत्तकः स्मृतः ?
५ पत्न्या मन्त्रवत्कर्म कुत्र कर्तव्यम् ?
६ असंस्कृतानां पिण्डं कुत्र दातव्यम् ?
७ दर्भसङ्ख्या कुत्र न विहिता ?
८ मातृश्राद्धे विप्रालाभे काः भोजनीयाः ?
९ नान्दीमुखानां पितॄणां तर्पणं कदा कर्तव्यम् ?
१० अश्रुमुखाः पितरः के परिकीर्तिताः ?
११ समावर्तने केन नान्दीश्राद्धं कर्तव्यम् ?
१२ धर्मः शब्दस्य कोऽर्थः ?
१३ सिन्धुः शब्दस्य कोऽर्थः ?
१४ संस्काराः कति सन्ति ?
१५ अभ्युदयश्राद्धं कस्य कर्तव्यम् ?

****